# MASTER OF ARTS EXAMINATION, 2025

**1st Year, 2nd Semester**

**DEPARTMENT OF SANSKRIT**

**Subject Code : SANS/PG/2.3**

**SANSKRIT DRAMA**

*Time : Two Hours* *Full Marks* : **30**

(क-विभागः)

१. 'हन्त! वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति।'

कदा कस्योक्तिरियम्? जनस्थानवृत्तान्तेन किं ज्ञापितम्? अस्य जनस्थानवृत्तान्तस्योपस्थापनेन किं नाटकीयतात्पर्यं साधितम्? 1+3+3

अथवा

उत्तररामचरितस्य प्रथमाङ्के रसवैचित्र्यं यदुपलब्धं समासतो तदालोच्यताम्।

२. सुरगिरा देवनागर्या लिप्या च **चत्वारः प्रश्नाः** समाधेयाः। 1X4=4

क. उत्तररामचरितस्य प्रथमाङ्कस्य नाम किम्?

ख. गौतमः कः? राम-सीतयोः वैवाहिकसम्बन्धे तस्य का भूमिका आसीत्?

ग. निषादपतिना सह रामस्य कुत्र समागमो भवत्?

घ. लक्षण-भरतयोः पत्न्योः नामनी लिख्येताम्।

ङ. किं नाम आरण्यकव्रतम्?

च. माल्यवान् कीदृशः?

३. सुरगिरा देवनागर्या लिप्या च **सप्रसङ्गमेकस्य** व्याख्या लेखनीया। 4

क. ब्रह्मादयो ब्रह्महिताय तप्ता परःसहस्रं शरदां तपांसि।
एतान्यदर्शन्गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि॥

ख. विस्रम्भादुरसि निपत्य जातनिद्रामुन्मुच्य प्रियगृहिणीं गृहस्य लक्ष्मीम्।
आतङ्कस्फुरितकठोरगर्भगुर्वीं क्रव्याद्भ्यो बलिमिव दारुणः क्षिपामि॥

४. **चत्वारः प्रश्नाः** सुरगिरा देवनागरीलिपिमाश्रित्य च समाधेयाः। 4

क) किमर्थं वसन्तसेना चारुदत्तस्य गृहं प्रविष्टा?

ख) चारुदत्तः कदा आत्मानम् अदरिद्रः इति कथयति?

ग) कदा संवाहकः वसन्तसेनायाः समीपे आगतवान्?

घ) दर्दुरकः कीदृशः?

ङ) मदनिका कीदृशी?

५. मृच्छकटिकस्य प्रथमाङ्के शकारचरित्रस्य वैशिष्ट्यं यथा चित्रितं तत्समासेन लिख्यताम्। 6

अथवा

मृच्छकटिकस्य प्रथमाङ्के दर्शितं विटचरित्रमवलम्ब्य संक्षिप्तो निबन्धो रचनीयः।

६. सुरगिरा देवनागर्या लिप्या च सप्रसङ्गमेकस्य व्याख्या लेखनीया। 5

क) अन्धस्य दृष्टिरिव पुष्टिरिवातुरस्य
मूर्खस्य बुद्धिरिव सिद्धिरिवालसस्य।
स्वल्पस्मृतेर्व्यसनिनः परमेव विद्या।
त्वां प्राप्य सा रतिरिवारिजने प्रणष्टा॥

ख) धिगस्तु खलु दारिद्यमनिवेदितपौरुषम्।
यदेतद्गर्हितं कर्म निन्दामि च करोमि च॥

******